अपरतिः ४ उपरतिः ५ आरतिः ६। इति हेमचन्द्रः ॥ ( यथा, गरुड़पुराणे १६६ अध्याये ।
"वास्तोदकञ्च समधु पीतमन्तर्गतस्य वै ।
पापरोगस्य सम्पापनिवृत्तिं कुरुते ध्रुवः ॥")
प्रवृत्तिप्रागभावः । यथा, "प्रवृत्त्युपाधिना विनाशं प्राप्तात् प्रागभाव एव स्वनिवृत्तिनिराकरणात् साध्यमानो निवृत्तिरुच्यते ।" इत्येकादशीतत्त्वे कलञ्जाधिकरणविचारः ॥

निवेदनं, क्ली, (निविद्यते विज्ञाप्यतेऽनेनेति । नि+विद्+ल्युट् । ) आवेदनम् । विज्ञापनम् । समर्पणम् । यथा,—
"श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनम् ।
अर्च्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥
इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा ।"
इति श्रीभागवतम् । ७ । ५ । २३ ॥

निवेदितं, त्रि, ( नि+विद्+कर्म्मणि क्तः । ) कृतनिवेदनम् । यथा, नन्दिकेश्वरपुराणे ।
"मया निवेदितं भक्त्या गृहाण परमेश्वरि ! ॥"

निवेशः, पुं, ( नि+विश्+घञ् । ) विन्यासः । ( निविशन्त्यस्मिन्निति । अधिकरणे घञ् । ) शिविरम् । ( यथा, महाभारते । ५ । ८ । ६ ।
"तस्य सेनानिवेशोऽभूदध्यर्द्धमिव योजनम् ॥")
उद्वाहः । इति मेदिनी । शे, २१ ॥ ( यथा, महाभारते । १ । १४ । १ ।
"ततो निवेशाय तदा स विप्रः संशितव्रतः ।
महीं चचार दारार्थी न च दारानविन्दत ॥")
निवेशनम् । इति शब्दरत्नावली ॥ ( यथा, देवीभागवते । ३ । १६ । ४४ ।
"निवेशार्थं गृहं दत्तमन्नपानादिकं तथा ।
सेवकं समनुज्ञाप्य परिचर्य्यार्थमेव च ॥" )

निवेशनं, क्ली, ( निविशन्त्यस्मिन्निति । नि+विश्+अधिकरणे ल्युट् । ) गृहम् । इति जटाधरः ॥ ( यथा, देवीभागवते । ३ । २४ । ४६ ।
"स्त्रियोपसंयुतः सोऽपि प्राप्यायोध्यां सुदर्शनः ।
सम्मान्य सर्व्वलोकांश्च ययौ राजा निवेशनम् ॥")
नगरम् । इति हेमचन्द्रः ॥ ( यथा, रामायणे । ७ । ७५ । १८ ।
"यो हि वंशं समुत्पाद्य पार्थिवस्य निवेशने ।
न विधत्ते नृपं तत्र नरकं स हि गच्छति ॥")
प्रवेशः । निवेशनमस्य वास्तुतिभिरिति स्मृतिः ॥ ( नि+विश+णिच्+भावे ल्युट् । स्थापनम् । यथा रामायणे । ७ । ७५ । १७ ।
"निवेशय महाबाहो भरतं यद्यपेक्षसे ।
गूरस्तं कृतविद्यञ्च समर्थञ्च निवेशने ॥"
प्रवेशके, त्रि ॥ यथा, हरिवंशे भविष्यपर्व्वणि । १८ । २३ ।
"आकाशोऽवस्थितः शब्दः सर्व्वस्योपनिवेशनः ।
नमस्ते भगवन् ! विष्णो तुभ्यं शब्दात्मने नमः ॥")

निवेशनीयः, त्रि, (नि+विश+अनीयर् ।) निवेशनार्हः यथा । ततुपुत्रपायव्यापारलोप्यत्वादवान्तरे निवेशनीय इति वाक्यं दोषः । इति सव्यभिचारे गदाधरः ॥

निवेश्यः, त्रि, (नि+विश+ण्यत् ।) निवेशनीयः । यथा, वाधटीकायां गदाधरः । प्रतिबन्धकतायां निवेश्यत्वादिति प्रकृति ॥ ( यथा, हरिवंशे । ११५ । २८ ।
"तदिदं पूः प्रकाशार्थं निवेश्या मयि सुव्रत ! ॥"
शोधनीयः । यथा, महाभारते । ३ । ३६ । १६ ।
"अवश्यं राजपिण्डस्तैर्निवेश्य इति मे मतिः ॥"
"निवेश्यः आनृण्यार्थं शोधनीयः ।" इति तट्टीकायां नीलकण्ठः ॥ विवाहार्हः । यथा, महाभारते । १ । १६२ । ६ ।
"भवान्निवेश्यः प्रथमं ततोऽयं
भीमो महाबाहुरचिन्त्यकर्म्मा ॥"
"निवेश्यः विवाह्यः ।" इति तत्र नीलकण्ठः ॥)

निशठः, पुं, बलदेवपुत्रः । यथा, "बलदेवोऽपि रेवत्यां निशठोल्मुकौ पुत्रावजनयत् ।" इति विष्णुपुराणे । ४ अंशे १५ अध्यायः ॥

निशमनं, क्ली, ( नि+शम+णिच्+ल्युट् । ) दर्शनम् । श्रवणम् । इति मेदिनी । ने, १६० ॥

निशा, स्त्री, ( नितरां श्यति तनूकरोति व्यापारानिति । नि+शो+कः । टाप् । ) रात्रिः । तत्पर्य्यायः । रात्री २ रजोजननी ३ शर्व्वरी ४ चक्रभेदिनी ५ घोरा ६ श्यामा ७ याम्या ८ दोषा ९ तुङ्गी १० भौती ११ शताक्षी १२ वास्तवा १३ उषा १४ वासतेयी १५ तमा १६ मिट् १७ । इति त्रिकाण्डशेषः ॥ अवशिष्टो रात्रिशब्दे द्रष्टव्यः ॥ ( यथा, ऋतुसंहारे । १ । ६ ।
"सितेषु हर्म्येषु निशासु योषितां
सुखप्रसुप्तानि मुखानि चन्द्रमाः ।
विलोक्य निर्यत्नमसुत्सुकश्चिरं
निशाक्षये याति ह्रियेव पाण्डुताम् ॥" )
हरिद्रा । दारुहरिद्रा । इति मेदिनी । शे, ६ ॥ ( अस्याः पर्य्यायो यथा,—
"हरिद्रा पीतिका गौरी काञ्चनी रजनी निशा ।
मेहघ्नी रञ्जनी पीता वर्णिनी रात्रिनामिका ॥"
इति वैद्यकरत्नमालायाम् ॥)
मेषवृषभमिथुनकर्कटधनुर्मकरलग्नानि । यथा,—
"अजगोमिथुनं कर्किधन्विनक्रास्तथा ।
निशासंज्ञाः स्मृताश्चैते शेषाश्चान्ये दिनात्मकाः ॥"
इति ज्योतिस्तत्त्वम् ॥

निशाकरः, पुं, ( निशां करोतीति । निशा+कृ+"दिवाविभानिशेति ।" ३ । २ । २१ । इति टः । ) चन्द्रः । इत्यमरटीका ॥ ( यथा, पञ्चतन्त्रे । २ । २० ।
"रविनिशाकरयोर्ग्रहपीडनं
गजभुजङ्गविहङ्गमबन्धनम् ।
मतिमतां च निरीक्ष्य दरिद्रतां
विधिरहो बलवानिति मे मतिः ॥" )
कुक्कुटः । इति शब्दरत्नावली ॥ ( निशाकरश्चन्द्रः शिरोदेशेऽस्यास्तीति । अच् । महादेवः । यथा, महाभारते । १३ । १७ । ७७ ।
"रतिहासः सकलश्च गौतमोऽथ निशाकरः ॥")

निशागणः, पुं, ( निशानां रात्रीणां गणः । ) रात्रिसमूहः । तत्पर्य्यायः । गणरात्रम् २ । इति हेमचन्द्रः ॥

निशाचरः, पुं, ( निशायां रात्रौ चरतीति । निशा+चर+"चरेष्टः ।" ३ । २ । १६ । इति टः । ) राक्षसः । ( यथा, रघुः । १० । ४५ ।
"अचिरात् यज्वभिर्भागं कल्पितं विधिवत् पुनः ।
मायाविभिरनालीढमादास्यध्वे निशाचरैः ॥")
शृगालः । पेचकः । सर्पः । इति मेदिनी । रे, २७२ ॥ चक्रवाकः । इति शब्दरत्नावली ॥ भूतः । इति धरणिः ॥ चोरकः । इति राजनिर्घण्टः ॥ ( अयन्तु गन्धिपर्णस्य भेदः । भटेउर इति नेपालदेशे भवति ।
"निशाचरो धनहरः कितवो गणहासकः ।
चोरको मधुरस्तिक्तः कटुपाके कटुर्लघुः ॥
तीक्ष्णो कुष्ठो हिमो हन्ति कुष्ठकण्डूकफानिलान् ।
रक्षोऽश्रीस्वेदमेदोऽसृग्ज्वरगन्धविषव्रणान् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
महादेवः । यथा, महाभारते । १३।१७।६७।
"वसुवेगो महावेगो मनोवेगो निशाचरः ॥" )
रात्रिचरमात्रे, त्रि ॥

निशाचरी, स्त्री, ( निशायां चरतीति । चर+टः । स्त्रियां ङीप् । ) कुलटा । इति मेदिनी । रे, २७३ ॥ केशिनीनामगन्धद्रव्यम् । इति जटाधरः ॥ राक्षसी । यथा,—
"अनिर्वृतिनिशाचरी मम गृहान्तराले स्थिता
निहन्ति निगमागमस्मृतिपुराणशास्त्रोदिताम् ।
क्रियां तदनुगा सखी हृदय एव चिन्ताविश-
त्ययोर्दमनकारणं त्वमसि केवलं भूपते ॥"
इत्युद्भटः ॥
( यथा च रघुः । ११ । २० ।
"राममन्मथशरेण ताड़िता
दुःसहेन हृदये निशाचरी ।
गन्धवद्रुधिरचन्दनोक्षिता
जीवितेशवसतिं जगाम सा ॥"
"अत्र ताड़कायाः अभिसारिकया समाधिरभिधीयते रामेति । निशासु चरतीति निशाचरी राक्षसी अभिसारिका च ।" इति तत्र मल्लिनाथः ॥ )

निशाचर्म्म, [ न् ] क्ली, ( निशायाश्चर्म्मेव आवरकत्वात् । ) अन्धकारः । इति त्रिकाण्डशेषः ॥

निशाजलं, क्ली, ( निशोद्भवं जलम् । मध्यपदलोपिसमासः । ) हिमम् । इति त्रिकाण्डशेषः ॥

निशाटः, पुं, ( निशायां रात्रौ अटतीति । अट+अच् । ) पेचकः । इति हेमचन्द्रः । ४ । ३६० ॥ निशाचरे, त्रि ॥

निशाटकः, पुं, (निशायां अटति निशावत् कृष्णत्वं अटतीति वा । अट+ण्वुल् ।) गुग्गुलुः । इति राजनिर्घण्टः ॥ ( रात्रिचरे, त्रि । )

निशाटनः, पुं, ( निशायां अटतीति । अट गतौ+ल्युः ।) पेचकः । इति हलायुधः ॥ निशाचरे,त्रि ॥